# 7. क्रीडादिवसः









(एकस्मिन् विद्यालये क्रीडादिवसः अस्ति।
तदा द्वौ छात्रौ परस्परं वार्तालापं कुरुतः।)

सुनीलः – प्रिय मित्र अनिल! अद्य त्वम् अतिप्रसन्नः असि। किं कारणम्?

अनिलः – आश्चर्यम्! त्वं न जानासि? अस्माकं विद्यालये अद्य क्रीडादिवसः अस्ति।

सुनीलः – क्रीडादिवसः! अस्माकं प्रियः उत्सवः।

अनिलः – आम्। जानासि? अद्य क्रीडाङ्गणे दीपशिखाम् अहम् एव वहामि।

सुनीलः – अतिशोभनम्। शुभ-समाचारः अयम्। प्रतिवर्षं त्वम् एव
धावन-प्रतियोगितायाम्,
दीर्घ-उत्पतन-प्रतियोगितायाम्,
पादकन्दुक-क्रीडायां,
खो-खो- क्रीडायां च
सर्वोत्तम-योग्यता- पत्रं
प्राप्नोषि। अस्मिन् वर्षे
अपि तत् प्राप्तुं प्रयत्नं कुरु।

अनिलः – अवश्यं करोमि बन्धो!

सुनीलः – अस्य उत्सवस्य मुख्यः अतिथिः कः?

अनिलः – अस्माकं राज्यस्य खेलमन्त्री।

सुनीलः – एवम् महान् प्रमोदः ।

अनिलः – सः एव पारितोषिकाणि वितरिष्यति।

सुनीलः – समीचीनम्। तस्य हस्तात् पदकस्य पारितोषिकस्य च ग्रहणं गौरवाय एव। अधुना गन्तव्यम्। सायङ्काले तव गृहम् आगमिष्यामि।

अनिलः – कृपया आगच्छ। अहं प्रीतिभोजनं दास्यामि।

सुनीलः – धन्यवादाः । पुनः मेलिष्यावः ।

## योग्यताविस्तारः

अस्मिन् सन्दर्भे छात्राणां मध्ये चतसृणां क्रीडानां परिचयः अस्ति–

(1) धावन–प्रतियोगिता,

(2) खो–खो–क्रीडा,

(3) पादकन्दुक–प्रतियोगिता,

(4) चतुरङ्ग–क्रीडा च।

खो–खो–क्रीडा – छात्राणां द्वे दले भवतः। प्रत्येक–दले नव क्रीडकाः भवन्ति। एकस्य दलस्य क्रीडकाः अपरदलस्य क्रीडकान् स्प्रष्टुं प्रयत्नं कुर्वन्ति। ते उत्साहेन खेलन्ति। द्वितीयस्य दलस्य क्रीडकाः आत्मरक्षणं कुर्वन्तिं ते स्पृष्टा भवितुं न इच्छन्ति। स्पृष्टः क्रीडकः खेलबाह्यः भवति।

**रंजयत**



# पादकन्दुक-प्रतियोगिता



**पादकन्दुक-प्रतियोगिता**

अत्र द्वे दले स्तः । प्रत्येक-दले एकादश क्रीडकाः सन्ति। अत्रापि एकः निर्णायकः अस्ति। सः क्रीडायाः समयम् अनुशासनं च पालयति। यत् दलं लक्ष्यं प्रति अधिकतमं कन्दुकं क्षिपति तत् विजयं प्राप्नोति।

# अनुशीलनम्

**1. पाठं पठित्वा अधोलिखितानां प्रश्नानाम् उत्तराणि आम् अथवा न इति कृत्वा लिखत।**

1. किं क्रीडादिवसः छात्राणां प्रियः उत्सवः अस्ति? ☐
2. किं क्रीडादिवसे दीपशिखायाः वहनं भवति? ☐
3. किम् अस्मिन् अवसरे सुनीलगवास्करः मुख्यः अतिथिः अस्ति? ☐
4. किं विद्यालयस्य प्राचार्यः पारितोषिकं वितरति? ☐

**2. पर्यायवाचक-शब्दयोः मेलनं कुरुत।**

| | | |
|---|---|---|
| *यथा प्रतियोगिता* | – | *स्पर्धा* |
| क्रीडाङ्गणम् | – | ग्रहणम् |
| पारितोषिकम् | – | अधुना |
| नैपुण्यम् | – | क्रीडाक्षेत्रम् |
| इदानीम् | – | पुरस्कारः |
| स्वीकरणम् | – | कुशलता |

3. विपरीतार्थस्य शब्दस्य मेलनं कुरुत।

| | |
|---|---|
| कीर्तिः | अयोग्यः |
| गच्छामि | सायङ्काले |
| योग्यः | दुःखितः |
| प्रसन्नः | पराजितः |
| प्रातःकाले | आगच्छामि |
| विक्रान्तः | अपकीर्तिः |

4. चित्रे प्रवर्तमानां क्रीडाम् अधिकृत्य त्रीणि वाक्यानि लिखत।



(i) ..........................................................................

(ii) ..........................................................................

(iii) ..........................................................................



(i) ..................................................................................

(ii) ..................................................................................

(iii) ..................................................................................



(i) ..................................................................................

(ii) ..................................................................................

(iii) ..................................................................................